-पु.नं. ८२

संस्कृत.

याज्ञिक.
विधि.

द्वादशवर्षानंतर भ्रातृदर्शनविधि.

/ ३७२

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥ अथ द्वादशवर्षानंतरभ्रातृदर्शनाविधिः॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(२

श्रीगणेशायनमः॥द्वादशाब्देव्यतीतेतुनकुर्याद्भ्रातृदर्शनं।पित्रोपुत्रस्यनेत्रादुर्महाहानिक
रंभवेत्।दर्शनंयदिकुर्वन्तिशिवंपूज्यशिवालये।कांस्यपात्रंस्थापयित्वाअंतःपटविधान
तः॥२ जलपूर्णेकांस्यपात्रेपूर्वंमुखंनिरीक्षणे।मुखावलोकनंपश्चात्तामालिंग्यविपर्ययपा
त्।३ क्षेमवार्त्तोपुनःपृच्छेत्संतोषेष्ठापरस्परं।तद्दोषपरिहारार्थेमियेवंमनुरब्रवीदिति।४॥
धर्मदीपे॥ दंपतीपितृपुत्रौचस्वसारौभ्रातरौतथा।पितृव्यमातुलौचैवदौहित्रौभागिनेय
कः।१।पुत्रिकापितरौचैवभगिनीभ्रातरौतथा।द्वादशाब्देव्यतीतेतुदूरदेशंगतेयदि।२
एतेषामेकमेकोपिनान्योन्यमवलोकयेत्।इच्छंतिकेचिदाचार्याअन्योन्यमवलोकनं।३
शिवालयेथवातीर्थेस्नात्वाप्रज्वाल्यदीपकौ।शिवंसंपूज्यविधिवदुभौतौदेवमध्यतः।४
धृत्वाकांस्यमयंपात्रंसजलंरत्नपूरितं।शांतिदैर्मंत्रघोषैश्चद्विजस्तावलोकयेत्।५।
नारीकेलंचबादाममक्रोडबीजपूरकं।तेभ्यश्चखडनंकृत्वादद्याद्द्विजायसंनिधौ।६।आ
ननंचैकमेकस्यदृष्ट्वासमक्षंशिवंनमेत्।स्त्रादानानिदेयानितथावित्तानुसारतः।७।ब्राह्म
णेभ्योयथाशक्तिदद्यात्पात्रसदक्षिणं।अन्येभ्यश्चाथविप्रेभ्योयथावित्तानुसारतः।८।तेभ्यो

(2A)

पिदक्षिणादद्या पूजयेच्च पुनः शिवं । नत्वा देवद्विजान्सूर्यमागत्य स्वस्य मंदिरं ॥ ९ ॥ ततो व्या
हृतिभिर्होमं शतमष्टोत्तरं तिलैः । कृत्वा तु भोजयेद्विप्रान्यथाविभवानुसारतः ॥ १० ॥ ब्राह्मणैः सह
भुंजीत सर्वारिष्टप्रशांतये । इत्थं यः कुरुते विप्र तस्यारिष्टं न विद्यते ॥ ११ ॥ आयुष्कामी नरश्चैव
मकृत्वा नावलोकयेत् ॥ पूर्वावलोकितानां तु विधिरेष उदाहृतः ॥ १२ ॥ न चैवापूर्वदृष्टानामि
ति प्राहुर्मनीषिणः ॥ ॥ अथ प्रयोगः ॥ ज्योतिर्विदादिष्टे समये पुण्यजले स्नात्वा मंगलवेष
विधाय तीर्थे शिवालये वा देशं संस्कृत्य प्राङ्मुखो वा उदङ्मुखो वा शिवसंनिधाय ततः पटं व्यवधा
य स्वस्वपार्श्वे दीपं प्रज्वाल्योपविश्य भार्या संकल्पं कार्यः । कृ मुखश्चेत्यादि देशकालौ संकीर्त्य
मम जायाया द्वादशाब्दांतरितदर्शनायाः पुनर्दर्शने शास्त्रोक्तदोषनिरासार्थं शास्त्रोक्तवि
धिना पुनर्दर्शनमहं करिष्य इति पुंसः । मम पत्युर्द्वादशाब्दांतरितदर्शनस्येति स्त्रियः । एव
मन्येषामपि तत्तत्संबंधिवाचिपदप्रक्षेपेण संकल्पऊह्यः । एवं संकल्प्य । स्वस्तिपुण्याहवाचनं कृ
त्वाऽचार्यं चतुरऋत्विजश्च वृत्वायाधिकारमुभौ शिवं संपूज्य परस्परमवलोकयंतौ तिष्ठेतां ।
ततः आचार्यः कलशविधिना परस्परमुखप्रतिबिंबदर्शनयोग्यकांस्यपात्रं शिवस्य तयो
श्च मध्ये प्रतिबिंबदर्शनाविद्योतकं नवरत्नादिप्रक्षेपपूर्वं प्रतिष्ठाप्यापिहितमुखं तस्मिन्वरु

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

णं संपूज्य ऋत्विजस्तत्रोदकं शांतिपठनाय तदसंभवे आश्वलायन तैत्तिरीयादि शांतिपठनाय
वा नियुज्यात ।। संपूर्णेषु शांतिमंत्रेषु तस्मिन्कांस्यपात्रे जले तयोः परस्परमुखप्रतिबिंबदर्श
नमाचार्यः कारयेत् । ततो नारिकेलं बादाममक्रोडं बीजपुरं च ऋत्विक् द्वारा खंडीकृत्य ता
वुभौ पटव्यवहितावेव शिवसंनिधौ आचार्याय दत्वा ततो न्योन्यं पृष्ठाभिमुखे कृत्वांतःपटं प्रो
त्सार्य पृष्ठतः समालिंग्य ततः साक्षान्मुखं निरीक्ष्य ततो जातानंदातिभरेण चिरकांक्षितां कु
कुशलप्रश्नवार्तामन्योन्यं पृच्छेतां । ततश्च ऋत्विग्भ्यो यथाशक्तिमाचार्याय दक्षिणां कांस्यपा
त्रं च दत्वा पुनः शिवं संपूज्य दीनानाथादि संतोष्य देवद्विजसूर्यान्नत्वा गृहमागत्याचार्य
पुरःसरं अष्टोत्तरशततिलान्कृत्वा आचार्याय दक्षिणां दत्वा ब्राह्मणान्भोजयित्वा बंधुभिः
सह भुंजीतेति ।। ।। इति द्वादशाब्दादूर्ध्वमवलोकन समाप्तः ।।

२

इदं पुस्तकं गोखलोपनाम सदाशिवेन लिखितं ।।

# मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com